# आचार्यप्रथमवर्षम्

## प्रथमपत्रम्-प्राचीनन्यायवैशेषिकम्

## शैक्षिकनिष्पत्तिः

**ग्रन्थः ( -न्यायमञ्जरी)आदितः चतुर्थाह्निकपर्यन्तम्**

**अमुं पाठ्यग्रन्थमधीत्य छात्राः**

❖ शास्त्रस्य पुरुषार्थप्रतिपादकत्वम्, चतुर्दशविद्यास्थानानि, शास्त्रस्य वेदप्रामाण्यरक्षणक्षमत्वम्, अनुबन्धचतुष्टयं, प्रामाण्यपदार्थपरिशीलनं, कारकपदार्थं, धात्वर्थं ,करणपदार्थं, सामग्रीस्वरूपञ्च ज्ञातुं प्रभवेयुः ।

❖ प्रमाणचातुर्विध्यव्यवस्थापनम्, अर्थापत्तेः क्लृप्तप्रमाणेष्वन्तर्भावम्, अभावपदार्थं च विजानीयुः ।

❖ सदलकृत्यं प्रत्यक्षप्रमालक्षणं, तत्स्वरूपविभागित्वपरिशीलनं, सन्निकर्षवादम्, सुखादेः ज्ञानातिरिक्तत्वम्, सविकल्पकस्याशाब्दत्वम्, मतभेदेन अव्यपदेश्यस्वरूपम्, अव्यभिचारपदार्थपरिशीलनं, तत्पदसार्थक्यं च विजानीयुः।

❖ बौद्ध-जैमिनि-साङ्ख्याद्यभिमतप्रत्यक्षलक्षणपरिशीलनं, बौद्धमते कल्पनापञ्चकम्, योगिप्रत्यक्षसाधनम्, अनुमानप्रामाण्यपरिशीलनं, त्रिविधानुमानपरीक्षणम्, अनुमानस्य त्रैकालिकविषयग्राहकत्वं च अवगच्छेयुः।

कालदिशोर्व्यवस्थापनं, तयोरौपाधिकभेदम्, उपमानस्य प्रमाणान्तरत्वम्, न्यायमीमांसतयोः तत्वस्वरूपपरिशीलनादिकं च विजानीयुः ।

- ❖ शब्दस्य पृथक्प्रामाण्यव्यवस्थापनं, पूर्वपक्षनिरासपूर्वकं प्रामाण्यस्य परतस्त्वपरिशीलनम्, ख्यातिवादं, वेदप्रामाण्यं, जगदुत्पत्त्यादिकर्तृसर्वज्ञेश्वरसंसिद्धिं, जगद्वैचित्र्यस्य कर्माधीनत्वं च अवगच्छेयुः।
- ❖ शब्दनित्यत्ववादिमीमांसकमतपरिशीलनं, न्यायमतरीत्या सप्रमाणं शब्दानित्यत्वव्यवस्थापनं, वेदकर्तुरेव जगत्स्रष्ट्रृत्वम्, अथर्ववेद-आयुर्वेद-तन्त्रागमादीनां प्रामाण्यव्यवस्थापनं, कर्मणां फलजनकत्वविचारं, वेदप्रामाण्ये मतान्तरपरिशीलनं च विजानीयुः ।

*********